श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकोनाशीतितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकोनाशीतितमं दशकम् ॥

रुक्मिणीस्वयंवरवर्णनम्

बलसमेतबलानुगतो भवान्
    पुरमगाहत भीष्मकमानितः।
द्विजसुतं त्वदुपागमवादिनं
    धृतरसा तरसा प्रणनाम सा ॥ **79.1** ॥

भुवनकान्तमवेक्ष्य भवद्वपु -
    र्नृपसुतस्य निशम्य च चेष्टितम्।
विपुलखेदजुषां पुरवासिनां
    सरुदितैरुदितैरगमन्निशा ॥ **79.2** ॥

तदनु वन्दितुमिन्दुमुखी शिवां
    विहितमङ्गलभूषणभासुरा।
निरगमद्भवदर्पितजीविता
    स्वपुरतः पुरतः सुभटावृता ॥ **79.3** ॥

कुलवधूभिरुपेत्य कुमारिका
    गिरिसुतां परिपूज्य च सादरम्।
मुहुरयाचत तत्पदपङ्कजे
    निपतिता पतितां तव केवलम् ॥ **79.4** ॥

समवलोककुतूहलसङ्कुले
    नृपकुले निभृतं त्वयि च स्थिते।

नृपसुता निरगाद् गिरिजालयात्
सुरुचिरं रुचिरञ्जितदिङ्मुखा ॥ **79.5** ॥

भुवनमोहनरूपरुचा तदा
विवशिताखिलराजकदम्बया।
त्वमपि देव कटाक्षविमोक्षणैः
प्रमदया मदयाञ्चकृषे मनाक् ॥ **79.6** ॥

क्वनु गमिष्यसि चन्द्रमुखीति तां
सरसमेत्य करेण हरन् क्षणात्।
समधिरोप्य रथं त्वमपाहृथा
भुवि ततो विततो निनदो द्विषाम् ॥ **79.7** ॥

क्वनु गतः पशुपाल इति क्रुधा
कृतरणा यदुभिश्च जिता नृपाः।
न तु भवानुदचाल्यत तैरहो
पिशुनकैः शुनकैरिव केसरी ॥ **79.8** ॥

तदनु रुक्मिणमागतमाहवे
वधमुपेक्ष्य निबध्य विरूपयन्।
हृतमदं परिमुच्य बलोक्तिभिः
पुरमया रमया सह कान्तया ॥ **79.9** ॥

नवसमागमलज्जितमानसां
प्रणयकौतुकजृम्भितमन्मथाम्।
अरमयः खलु नाथ यथासुखं
रहसि तां हसितांशुलसन्मुखीम् ॥ **79.10** ॥

विविधनर्मभिरेवमहर्निशं
प्रमदमाकलयन् पुनरेकदा।

ऋजुमतेः किल वक्रगिरा भवान्
वरतनोरतनोदतिलोलताम् ॥ **79.11** ॥

तदधिकैरथ लालन कौशलैः
प्रणयिनीमधिकं सुखयन्निमाम्।
अयि मुकुन्द भवच्चरितानि नः
प्रगदतां गदतान्तिमपाकुरु ॥ **79.12** ॥

॥ इति श्रीमन्नारायणीये एकोनाशीतितमं दशकं समाप्तम् ॥